B.A./4th Sem (H)/SNSK/23(CBCS)

2023

## 4th Semester Examination

## SANSKRIT (Honours)

MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY

### Paper : C 8-T

### [Indian Epigraphy, Paleography, and Chronology]

Full Marks : 60 Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु प्रश्नेषु दश सुरगिरा देवनागरीलिप्या समाधेयाः। 2×10=20

(क) जन्-फेथ्फुल्-फ़्लीट्-महोदयेन रचितस्य ग्रन्थद्वयस्य नाम्नी लिख्येताम्।

(ख) हरकेलि इति नाटकं केन राज्ञा प्रणीतम्? कस्मिन् स्थाने प्राप्यते नाटकमिदम्?

(ग) प्राचीनभारतवर्षे कति ऋतवः सन्ति? नामानि प्रदीयन्ताम्।

(घ) पाणिनीयशिक्षानुसारं किमस्ति अधमपाठकस्य लक्षणम्?

(ङ) भारतवर्षे एतावत् कालपर्यन्तप्राप्तेषु संस्कृतभाषया

P.T.O.

MIDNAPORE CITY COLLEGE • ESTD 2017 • CENTRAL LIBRARY



लिखितेषु ताम्रशासनेषु आदिमं किम्? तस्य शासनस्य संभाव्यः कालो लेखनीयः।

(च) आदिब्राह्मीलिपेः पाठोद्धारे आदौ कः सफलोऽभवत्? आदिब्राह्मीलिपेः संपूर्णपाठोद्धारः केन कृतः?

(छ) अधोलिखितानां संकेतानां देवनागर्या अंकेन परिणमनं कार्यम्। (अंकानां वामागतिरिति सुत्रमवलम्ब्य)।

- पक्षद्वयरिपुपृथिवीमाने विसंवति
- शाके सिन्ध्वग्निबाणेन्दौ

(ज) अशोकराजप्रणीतेन मुख्यप्रस्तरानुशासनानि येषु स्थानेषु प्राप्यन्ते तेषु कस्यचित् चतुष्टयस्य उल्लेखः कार्यः।

(झ) के आसन् कायस्थाः? भारतीभाण्डागारः कः?

(ञ) प्रस्तरखानकाः लेख्येषु कीदृशीभिः अभिधाभिः उल्लिखिताः?

(ट) अशोकराजप्रणीते सारनाथगौणस्तम्भाभिलेखे 'ओदातानि', 'आनावासिस' चेति पदद्वयस्य कौ अर्थौ?

(ठ) प्रथमरुद्रदाम्नो जुनागडाभिलेखानुसारं प्रणयक्रिया का?

(ड) चन्द्रराजस्य मेहरौलिलेख्ये उल्लिखितायाः विष्णुपदगिरेः आधुनिकभौगोलिकस्थितिः निर्दिश्यताम्। मेहरौलि इति स्थानस्य प्राचीनं नाम किमासीत्?



MIDNAPORE CITY COLLEGE • ESTD 2017 • CENTRAL LIBRARY



(ढ) गुप्तनृपतेः समुद्रगुप्तस्य एराणाभिलेखानुसारं क आसीत् तस्य नृपतेः पत्नी? तस्याः विशेषणद्वयमभिलेखानुसारं लेखनीयम्।

(ण) भारतवर्षे उपलब्धेषु कृतपाठेषु अभिलेखेषु के तावत् प्राचीनतमाः? कया लिप्या ते लिखिताः?

2. अधोलिखितेषु प्रश्नेषु कस्यचिद् ***चतुष्टयस्य*** उत्तरं प्रदेयम्, येषु ***एकस्योत्तरं*** सुरगिरा देवनागर्या च देयम्। 5×4=20

(क) व्याख्या कार्या। 2.5+2.5

- यस्योद्वर्त्तयतः प्रतीपमुरसा शत्रून् समेत्यागतान्;
- दक्षिणापथपतेः सातकर्णेः द्विरपि निर्व्याजमवजित्याजित्य

(ख) प्राचीनभारतीयाभिलेखपाठे दीनेशचन्द्रसरकारमहाभागस्य अवदानं विचार्यताम्।

(ग) ब्राह्मीवर्णमालायाः पाठोद्धारवृत्तान्तःसमासत आलोचनीयः।

(घ) टिप्पणी रचनीया। 2.5+2.5

धर्मानुशंसनश्लोकाः; विक्रमाब्दः

(ङ) एपिग्राफि इति पदस्य कोऽर्थः? समासतो लिख्यताम्।

(च) गुप्तनृपतेः समुद्रगुप्तस्य एराणाभिलेखस्य भाषा लिपिश्च लेखनीये। अस्याभिलेखस्य महत्त्वं विचार्यताम्। 2+3

P.T.O.

MIDNAPORE CITY COLLEGE
ESTD 2017
CENTRAL LIBRARY



3. अधोलिखितेषु प्रश्नेषु कस्यचिद् *द्वयस्य* समाधानं कर्तव्यम्। 10×2=20

(क) प्रथमरुद्रदाम्नो जुनागडाभिलेखमाश्रित्य सुदर्शनसेतोः ध्वंसकारणं तथा जीर्णोद्धारप्रक्रिया आलोचनीये। 5+5

(ख) आदिब्राह्मीवर्णमालायाः वैशिष्ट्यानि सोदाहरणम् आलोच्यन्ताम्।

(ग) 'आविंध्यादाहिमाद्रेर्विरचितस्तीर्थयात्राप्रसंगादुद्ग्रीवेषु प्रहर्ता नृपतिषु —' कस्मिन् लेख्ये लेख्यांशोऽयं प्राप्यते? अस्मिन् लेख्ये कस्य नृपतेः प्रशस्तिः उपलब्धा? तस्य नृपस्य संभाव्यः कालो लिख्यताम्। अस्य लेख्यस्य ऐतिहासिकमहत्वं लेखनीयम्। 1+1+1+7

(घ) प्राचीनभारतीयोपमहादेशस्य राजनैतिकसामाजिकार्थ-नैतिकेतिहासविनिर्माणे अभिलेखानामुपयोगो विचार्यताम्।

---